श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री मुक्तिनाथ मङ्गलम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री मुक्तिनाथ मङ्गलम् ॥

श्रियः कान्ताय देवाय लक्ष्मीसंश्लिष्टवक्षसे।
प्रपन्नपारिजाताय मुक्तिनाथाय मङ्गलम्॥ १ ॥

परव्योमनिवासाय श्रीभूमिसहिताय च।
नानावताररूपाय मुक्तिनाथाय मङ्गलम्॥ २ ॥

नित्यमुक्तादिसेव्याय तपः स्वाध्यायशालिने।
वृन्दावन्दितपादाय मुक्तिनाथाय मङ्गलम्॥ ३ ॥

रामकृष्णावताराय परव्यूहस्वरूपिणे।
ब्रह्मरुद्रादिवन्द्याय मुक्तिनाथाय मङ्गलम्॥ ४ ॥

शिलासलिलरूपाय हिमालयविहारिणे।
तपस्विजनसेव्याय मुक्तिनाथाय मङ्गलम्॥ ५ ॥

तपसा तप्तदेहाय गण्डकीजनकाय ते।
गण्डर्षिवरदात्रे श्रीमुक्तिनाथाय मङ्गलम्॥ ६ ॥

शालङ्कायनसेव्याय सन्मुक्तिदानशालिने।
मुक्तिक्षेत्रनिवासाय मुक्तिनाथाय मङ्गलम्॥ ७ ॥

श्रीवैकुण्ठविरक्ताय गण्डकीतटवासिने।
रूद्रादिसेव्यपादाय मुक्तिनाथाय मङ्गलम्॥ ८ ॥

॥ इति श्री मुक्तिनाथ मङ्गलं सम्पूर्णम् ॥

www.prapatti.com